This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१६

॥ अथात्मषट्कप्रारंभः श्रीसद्गुरु प्रसन्नोस्तु ॥

ACC. NO:- ~~83~~ M1034
Title:- ~~आत्मषट्कं~~
( एतरेय उपनिषद )
Subject:- उपनिषद
पत्रे :- ७

KKSU LIBRARY RAMTEK 441 106 Dist Nagpur
M1034

(1)

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१८

ॐ हरिः ॐ ॐ ३ शन्नो मित्रः शं वरुणः ॥

१ ॐ शंनो भवत्वर्यमा ॥ ॐ शंन इन्द्रो बृह

स्पतिः ॥ ॐ शंनो विष्णुरुरुक्रमः ॥ ॐ ॥

१

१८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिष

त्स ईक्षत लोकान्नु सृजा इति स इमांल्लोकानसृज

तां भोमरीचीर्मैरमापोदों भः परेण दिवं द्यौः प्रतिष्ठां

तरिक्षं मरीचयः पृथिवी मरो या अधस्तात्ता आ

पः स ईक्षतेमे नु लोका लोकपालान्नु सृजा इति

सोद्भ्य एव पुरुषं समुद्धृत्यामूर्छयत्तमभ्यतपत्तस्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

2

3 प्राविशद्दिशः श्रोत्रं भूत्वा कर्णौ प्राविशन्नोषधिवनस्पतयो
लोमानि भूत्वा त्वचं प्राविशँश्चन्द्रमा मनो भूत्वा हृदयं प्रावि
शन्मृत्युरपानो भूत्वा नाभिं प्राविशदापो रेतो भूत्वा शिश्नं प्रा
विशँस्तमशनापिपासे अब्रूतामावाभ्यामभिप्रजानीहीति ते
अब्रवीदेतास्वेव वान्देवतास्वाभजाम्येतासु भागिन्यौ करो
मीति तस्माद्यस्यै कस्यै च देवतायै हविर्गृह्यते भागिन्यावे
वास्यामशनापिपासे भवतः ॥२॥ सईक्षतेमे नु लोकाश्च 3

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लोकपालाश्चान्नमेभ्यःसृजा इति सोपोभ्यतपत्ताभ्योभित
ताभ्यो मूर्त्तिरजायत यावै सा मूर्त्तिरजायतान्नं वै तत्तदेनत्सृ
ष्टं पराङत्यजिघांसत्तद्वाचाजिघृक्षत्तन्नाशक्नोद्वाचा ग्रही
तुं सयद्धैनद्वाचाग्रहैष्यदभिव्याहृत्य हैवान्नमत्रप्स्यत्त[illegible]
प्राणेनाजिघृक्षत्तन्नाशक्नोत्प्राणेन ग्रहीतुं सयद्धैन
त्प्राणेनाग्रहैष्यदभिप्राण्य हैवान्नमत्रप्स्यत्तच्चक्षुषाजिघृक्ष
त्तन्नाशक्नोच्चक्षुषाग्रहीतुं सयद्धैनच्चक्षुषाग्रहैष्यद्दृष्ट्वा हैवान्नम



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४

त्रप्स्यत्तच्छ्रोत्रेणाजिघृक्षत्तन्नाशक्नोच्छ्रोत्रेण ग्रहीतुं स यद्धै
नच्छ्रोत्रेणाग्रहैष्यच्छ्रुत्वा हैवान्नमत्रप्स्यत्तत्त्वचाजिघृक्ष
त्तन्नाशक्नोत्त्वचा ग्रहीतुं स यद्धैनत्त्वचाग्रहैष्यत्स्पृष्ट्वा हैवान्न
मत्रप्स्यत्तन्मनसाजिघृक्षत्तन्नाशक्नोन्मनसा ग्रहीतुं स य
द्धैनन्मनसाग्रहैष्यद्ध्यात्वा हैवान्नमत्रप्स्यत्तच्छिश्नेनाजि ४
घृक्षत्तन्नाशक्नोच्छिश्नेन ग्रहीतुं स यद्धैनच्छिश्नेना
ग्रहैष्यद्विसृज्य हैवान्नमत्रप्स्यत्तदपानेनाजिघृक्षत्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दा वयत्सैषोन्नस्य ग्रहो यद्वायुरन्नायुर्वा एष यद्वायुः
सईक्षत कथन्विदं मदृते स्यादिति सईक्षत कतरेण प्रप
द्या इति सईक्षत यदि वाचाभि व्याहृतं यदि प्राणेनाभि
प्राणितं यदि चक्षुषा दृष्टं यदि श्रोत्रेण श्रुतं यदि त्वचा स्पृ
ष्टं यदि मनसा ध्यातं यद्यपानेनाभ्यपानितं यदि शिश्नेन
विसृष्टमथ कोहमिति स एतमेव सीमानं विदार्यैतया द्वारा
प्रापद्यत सैषा विदृति नाम द्वास्तदेतन्नांदनं तस्य त्रय आ



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लोकपालाश्चान्नमेभ्यःसृजा इति सोपोभ्यतपत्ताभ्योभित
ताभ्यो मूर्तिरजायत यावैसा मूर्तिरजायतान्नवैतत्तदेनत्सृ
ष्टंपराङसाजिघांसत्तद्वाचाजिघृक्षत्तन्नाशक्नोद्वाचाग्रही
तुंसयद्धैनद्वाचाग्रहैष्यदभिआहृत्यहैवान्नमत्रप्स्यत्त
प्राणेनाजिघृक्षत्तन्नाशक्नोत्प्राणेनग्रहीतुंसयद्धैने
प्राणेनाग्रहैष्यदभिप्राण्यहैवान्नमत्रप्स्यत्तच्चक्षुषाजिघृक्ष
त्तन्नाशक्नोच्चक्षुषाग्रहीतुंसयद्धैनच्चक्षुषाग्रहैष्यद्दृष्ट्वाहैवान्नम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वसथास्त्रयः स्वप्ना अयमावसथोयमावसथ इति स जातो
भूतान्यभिव्यैख्यत्किमिहान्यंवावदिषादिति स एतमेव
पुरुषं ब्रह्म ततममपश्यदिदमदर्शमिती३॥ तस्मादिदंद्रो
नामेदंद्रो ह वै नाम तमिदंद्रं संतमिंद्र इत्याचक्षते परो
क्षेण परोक्षप्रिया इव हि देवाः परोक्षप्रिया इव हि देवाः॥
॥३॥ अपक्रामंतु गर्भिण्यः॥ पुरुषे ह वा अयमा

3

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६ द्वितीयं गर्भो भवति यदेवद्रेतस्तदेतत्सर्वेभ्योऽङ्गेभ्यस्तेजः
संभूतमात्मन्येवात्मानं बिभर्ति तद्यदा स्त्रियां सिंचत्यथै
नज्जनयति तदस्य प्रथमं जन्म तत्स्त्रिया आत्मभू
यं गच्छति यथा स्वमंगं तथा तस्मादेनां न हिनस्ति
सास्यैतमात्मानमत्र गतं भावयति सा भावयि
त्री भावयितव्या भवति तं स्त्री गर्भं बिभर्ति सोऽग्र ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एव कुमारं जन्मनो ग्रे धिभावयति स यत्कुमारं जन्म
नोग्रे धिभावयत्यात्मानमेव तद्भावयत्येषां लोका
नां सतत्या एवं संतता हीमे लोकास्तदस्य द्वितीयं ज
न्म सोस्यायमात्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयते
थास्यायमितर आत्मा कृतकृत्यो वयोगतः प्रैति स
इतः प्रयन्नेव पुनर्जायते तदस्य तृतीयं जन्म तदु

(6)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७ क्तमृषिणागर्भेनुसन्नन्वेषामवेदमहंदेवानांजनिमा
निविश्वा॥ श तंमापुरआयसीररक्षन्नधश्येनोजव
सानिरदीयमितिगर्भएवैतच्छयानोवामदेवएवमु
वाचसएवंविद्वानस्माच्छरीरभेदादूर्ध्वउत्क्रम्यामु
ष्मिन्स्वर्गेलोकेसर्वान्कामानाप्त्वामृतःसमभवत्सम ७
भवत्॥४॥ यथास्थानं तु गर्भिण्यः॥ कोयमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्मेति वयमुपास्महे कतरः स आत्मा येन वा पश्यति येन
वा शृणोति येन वा गंधानाजिघ्रति येन वा वाचं व्या
करोति येन वा स्वादु चास्वादु च विजानाति यदेतद्धृद
यं मनश्चैतत्संज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा दृ
ष्टिर्धृतिर्मतिर्मनीषा जूतिः स्मृतिः संकल्पः क्रतुरसुः
कामो वश इति सर्वाण्येवैतानि प्रज्ञानस्य नामधे



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यानिभवंसेषब्रह्मैषइंद्रएषप्रजापतिरेतेसर्वेदेवा
इमानिचपंचमाहाभूतानिपृथिवीवायुराकाशआ
पोज्योतींषीत्येतानीमानिचक्षुद्रमिश्राणीवबीजा
नीतराणिचेतराणिचांडजानिचजारुजानिचस्वेद
जानिचोद्भिजानिचाश्वागावःपुरुषाहस्तिनोय
त्किंचेदंप्राणिजंगमंचपतत्रिचयच्चस्थावरंसर्वंत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोकः प्रज्ञाप्रति
ष्ठा प्रज्ञानं ब्रह्म स एतेन प्रज्ञेनात्मनास्माल्लोकादुत्क्र
म्यामुष्मिन्स्वर्गे लोके सर्वान्कामानाप्त्वामृतः समभव
(समभवत्)॥५॥ वाङ्मे मनसि प्रतिष्ठिता मनो मे वाचि
प्रतिष्ठितमाविरावीर्म एधि वेदस्य म आणीस्थ श्रुतं मे
मा प्रहासीरनेनाधीतेन॥ अहोरात्रान्संदधाम्यृतं वदि

(8)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्यामि सत्संवदिष्यामि तन्मामवतु तद्वक्तारमवत्व

२ वतु मामवतु वक्तारमवतु वक्तारं ।।६।। समाप्ता:।।

ॐ शांती: शांती: शांती:।।

ऐतरेयउपनिषद आसम बद्दक संपूर्ण स्वार्थपरार्थी।

KKSU LIBRARY
RAMTEK
441 106
M1034
Dist. Nagpur



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=23.09.20 16:39
,TRANSFERRED=2020/09/23 at 16:41:41
,PAGES=16
,TYPE=STD
,NAME=S0003697
,Book Name=M-1034-AATMASHASTAK
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection